THE ṚJUBHĀṢYA ON THE ŚUKLA YAJURVEDA

M. L. WADEKAR* & MILIND JOSHI*

Introductory :

The text of the *Śukla Yajurveda* in the *Mādhyandina* Recension constitutes forty *adhyāyas*, incorporating *Mantras* dealing with several *Śrauta* Sacrifices. The *adhyāya* thirty first contains the philosophical *Puruṣasūkta* and the last fortieth *adhyāya* is the foremost *Īśāvāsyopaniṣad*. The text of this recension is commented upon by Uvaṭa and Mahīdhara- the great commentators, whose commentaries on the said text have been published.[1] There is also an allusion to a commentary called *Ṛjuvyākhyāna*, but, it is not yet given much attention to by scholars. A Manuscript of fragmentary nature is available in the Oriental Institute of Baroda. The present study in this article is based upon the same. We have also tried to present the text of the commentary as is available in the said single, rare Manuscript.

The Rare Manuscript :

The Oriental Institute of Baroda has a huge collection of 28,000 Manuscripts. Of them, Several Manuscripts on different subjects, are quite rare, and unique, forming - sometimes even *Codex-Unicum*. The work under discussion is also one of such commentaries found in a rare and unique manuscript. The work *Ṛjuvyākhyāna* is available in manuscript no. 10,600 of Oriental Insitute. It is a manuscript having 27 folios, written in *Devanāgarī* script, forming about 500 *granthas*. The fragmentary folios of the manuscript do not contain commentary on the entire *Śukla Yajurveda* but only on the *adhyāyas* 29, 30, 31, 38, 39 (Incomplete) and 40 of text that too not in a good condition. The commentary on the *adhyāya* 39 is only upto the sixth mantra while the text of the commentary of the available *adhyāyas* is also much damaged. There are 36 letters to a line and 9 lines to a page or one side of the folio. The handwriting also is not much good but is readable. There is no

---

Journal of the Oriental Institute, Vol. 49, Nos. 1-2, Sept.-Dec., 1999 Issue, pp. 7-26.

* Oriental Institute, M. S. University of Baroda, Vadodara-390 001.

1. Panshikar, Vasudev Laxman (ed.) : *Śukla Yajurveda Saṁhitā (Śrīmad Vājasaneyi Mādhyandina)* with the *Mantrabhāṣya* of Mahāmahopādhyāya Śrīmad Uvaṭācārya and the Vedadīpabhāṣya of Śrīman Mahīdhara. (with Appendices and *Mantrakośa*), Second Edition, Published by Pandurang Jawaji, Proprietor of the "Nirnaya sagara" Press, Bombay, 1929.

use of *avagraha* sign. The scribe has always written छ for च्छ, स्छ for त्थ. There is much use of *pṛṣṭhamātrā*. The red pigment is utilized to mark the *lemma* of the text of the *Saṁhitā* and corrections are made by *pr.m.* The complete manuscript of the work is hitherto not known.

The post colophon entry[2] of the Manuscript gives us the authentic information about the date of the scribe and the manuscript. It is mentioned there that the manuscript was copied in *Saṁvat* 1564 (1548 A.D.), on the 14th day of the bright half of *Fālguna* month. Mālaji may be the name of the scribe, who might have hailed from Gujarat, as the date is mentioned in *Vikrama Saṁvat*.

The Commentator :

The colophons of the available *adhyāya*s of the text mention the title simply as *'Ṛjubhāṣye Saṁhitāyām'*, *'Ṛjuvyākhyāyām Saṁhitāyām'*, *'Ṛjuvyākhyāne Saṁhitāyām'* or simply *'Mantrabhāṣye'*, but no more information about the commentator is available. Pt. Shridhara Shastri Vare in his book *"Yājñavalkya Carita Vā Śuklayajurveda Vaidika Vāṅmaya Paricaya"* (Published by the author in 1936 at Nasik) gives some valuable information about the commentator, which throws some light on the name of the commentator, his date and home. According to this information, the commentator Gauradhara wrote the commentary named *Ṛjubhāṣya* on the *Śukla Yajurveda*. It is said to be known as *Vedavilāsa*. He might be a resident of Kashmir. Pt. Jagaddhara, the famous author of the *Stutikusumāñjali* and the commentator of the *Mālatīmādhava* was his grandson. In the last two verses of the *Stutikusumāñjali* of Jagaddhara, Gauradhara is stated to have written the *Ṛjuvyākhyā* on the *Śukla Yajurveda*[3].

पुरा पुरारेः पदधूलिधूसरः सरस्वतीस्वैरविहारभूरभूत् ।
विशालवंशश्रुतवृत्तिविश्रुतो विपश्चितां गौरधरः किलाग्रणीः ॥ १ ॥

अनन्तसिद्धान्तपथान्तगामिनः समस्तशास्त्रार्णवपारदृश्वनः ।
ऋजुर्यजुर्वेदपदार्थवर्णना व्यनक्ति यस्याद्भूतविश्रुतं श्रुतम् ॥ २ ॥

---

2. इति ऋजुव्याख्याने संहितायां चत्वारिंशत्तमोध्यायः ॥ संवत् १५६४ फागुण शु १४ भूमे लिखि १०५ ॥ मालजी ॥ Oriental Institute MS. ACC. NO. 10600, Last folio.

3. Vare, Shridhar Shastri : *Yājñavalkya carita Vā Śuklayajurveda Vaidika Vāṅmaya Paricaya*, Published by Pt. Shridhar Shastri Vare, Nasik, 1936, *Uttarārdha*, p. 14 & 15.

   Pandit Durgaprasad & Parab, Kashinath. P. (ed.) : *Stutikusumāñjali of Jagaddhara Bhaṭṭa*, with com. of Rajānaka Ratnakaṇṭha, Kavyamala Series No. 23, Nirnay Sagar Press, 1891, pp. 450-451.

The commentator Ratnakaṇṭha explains this as follows[4] -

''तादृशस्य गौरधरस्य ऋजुर्निर्मला निर्दोषा च यजुर्वेदपदानामर्थवर्णना भाष्यपद्धतिर्वेदविलासनाम्नी यस्याद्भुतं विश्रुतं प्रसिद्धं श्रुतं व्यनक्ति प्रकटयति''

This shows that Gauradhara wrote a commentary *Vedavilāsa* also known as *Ṛjubhāṣya*. From this external evidence only, we can state that the present commentary is by Gauradhara but there is no mention of the name of this commentator anywhere in the available text of the commentary.

"Jagaddhara is believed to have flourished in c.1352 A.D., hence Gauradhara may be placed in a period 60 years before Jagaddhara" writes Pt. Vareshastri.[5]

About Jagaddhara, the *New Catalogus Catalogorum*, notes the following important information[6] -

Jagaddhara (Paṇḍita) of Kashmir (c. 1350-1400 A.D.) son of Rathadhara and grandson of Gauradhra and father of Yaśodhara (for whom he wrote the *Kātantravṛtti*); ref. to by his descendant Śitikaṇṭha (a. of c. on his gr. book).

— *Apaśabdanirākaraṇa*. gr. BORI. 271 of 1875-76. Report XVIII.

— C. *Bālabodhinī* on *Kātantravyākaraṇa* - Kashmir recension; written for his son Yaśodhara (14th Cent.) IO. 7879. Q. by Ratnakaṇṭha in his C. on *Stutikusumāñjali* 5.6. See NCC. III p 317 a.

— *Stutikusumāñjali*. *Stotra* on Śiva in 38 chs. containing 1409 verses. Ptd. K.M. 23. Q in Sbhv.

Moreover Pt. Siddheshwar Shastri Chitrav[7] also gives some details about Jagaddhara. He flourished in about 1350 A.D. His works are *Mālatīmādhavaṭīkā*, *Devīmāhātmyaṭīkā*, *Bhagavadagītāpradīpa*, *Rasadīpikā*, *Meghadūtaṭīkā*, *Tattvadīpinī*, *Vāsavadattāṭīkā*, *Veṇīsaṁhāraṭīkā*. Vidyādhara - the grandson of Jagaddhara - was contemporary of Pratāparudra (1296-1323 A.D.) who was foremost ruler of the Kākatīya dynasty of Andhara Pradesa. This determines the date of Jagaddhara.

---

4. *Ibid, Uttarārdha*, p. 15. and *Stutikusumāñjali*, pp. 450-451.
5. *Ibid, Uttarārdha*, p. 15.
6. Raja Kunjunni K., *New Catalogus Catologrum*, University of Madras, 1973, Vol. 7, p. 131.
7. Chitrav Siddheshwar Shastri : *Madhyayugīna Caritrakośa*, Bharatavarshiya Caritrakosha Mandal, Pune, p. 388.

The Commentator's noteworthy remarks :

It is evident from the title of the commentory itself that it is a *rju* Commentary i.e. a stainless, faultless way of commenting, describing the meaning of the words of the *Yajurveda* - as explained by Ratnakaṇṭha. It is after all a simple, straightforward commentary without any conscious effort at exhibiting one's own scholarship in grammar or Vedas. However, even from the available protion of the commentary many a striking and noteworthy remark not found in the commentaries of Uvaṭa and Mahīdhara is met with. Some of them are noted below for the benefit of scholars in the field. These will be separately studied in a forthcoming article.

(१) जुषाणामिति विभक्तिव्यत्ययः ॥ २९/४ ॥

(२) तनूनपाच्छब्दः द्विरुदात्तः । आमन्त्रितत्वादाद्युदात्तः ॥ २९/२६ ॥

(३) नकारोऽयमुपमानार्थः ॥ २९/३० ॥

(४) मनुषः वीप्सालोपः ॥ २९/३२ ॥

(५) द्वितीयार्थे प्रथमा व्याख्यायते ॥ २९/३९ ॥

(६) 'ऊधसोनङ् धनुषश्चे'त्यनङादेशः ॥ २९/३९ ॥

(७) योषे योषा इति विभक्तिव्यत्ययः ॥ २९/४१ ॥

(८) अपेत्यव्ययम् ॥ २९/४४ ॥

(९) उक्तं च - केचित्त्रिपाच्छब्देनादित्यं वर्णयन्ति । स हि ऋग्यजुःसाममयः । यद्वा यद्योगिभिरात्मतत्त्वेन ध्येयम् । 'यदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म विज्ञानमानन्दं ब्रह्मे'त्येवमादिभिः वाक्यैः प्रतिपादितम् । तत्त्रिपाद्युक्तम् । ये गुणाः सत्यसंकल्पादयः ते दिवीत्युक्ताः ॥ ३१/३ ॥

(१०) अत्र बहून्यपत्यानि व्याख्यातानि विद्यन्ते ग्रन्थविस्तरभयान्नोच्यन्ते ॥ ३१/५ ॥

(११) विभक्तिव्यत्ययः आरण्यान् ग्राम्यांश्च यान् इति समञ्जसम् ।

(१२) तत्र श्रुतिः - 'यान्वैतां सप्तपुरुषानेकं पुरुषमकुर्वन्' । इत्युपक्रम्य 'स एतं लोकमगच्छदि'त्यभिधाय देवयज्ञेनैव यष्टुमद्रियन्त । तस्मादेतदृषिणाभ्यनूक्तं - 'यज्ञेन यज्ञमयजन्त देवा' इति ।

(१३) तदस्य ऊरू यद्वैश्यः यत्तदोर्व्यत्ययः । अस्य पुरुषस्य यौ ऊरू वैश्यः कृत आसीदित्यध्याहारः ॥ ३१/११ ॥

(१४) विपरीतोऽत्र करणमार्गः । चक्षोः सूर्यो अजायत । चक्षोरिति लिङ्गव्यत्ययः । श्रोत्राद्वायुश्च प्राणश्च । ननु प्राणाद्वायोरुत्पत्तिः श्रूयते । कथं एतत्पुरुषस्य सृजतः ? स्वेच्छया कार्यकारणभावः । मुखादग्निरजायत ॥ ३१/१२ ॥

(१५) ते ह नाकं महिमानः सचन्त । कमिति सुखनाम । तदेकेन नञा प्रतिषिद्धम् । स द्वितीयेन पुनः प्रतिषिध्यते । सर्वत्रैव स किंचित्सुखं किंचित् दुःखम् । अत्र तु सुखमेव पुण्यकृतो गच्छन्ति ॥ ३१/१६ ॥

(१६) देवत्वेन विभक्तिव्यत्ययः ॥ ३१/१७ ॥

(१७) इषु इच्छायां रूपद्वयम् । कर्तरि विकरणव्यत्ययः ॥ ३१/१७ ॥

The above peculiar remarks not only point out his conscientious study of the *mantras*, but also his knowledge of grammar. It is also noteworthy, however, that in the available portion, there is a commentary on some *mantras*, which at times resembles Uvaṭa (c. 1100 A.D.) but never with Mahīdhara (c. 1700 A.D.). This resemblance may be due to identical tradition, which might have been transmitted through identical preceptor.

As the Manuscript and the commentary are quite rare & important and are in great demand from the scholars of the *Śukla Yajurveda*, the available portion is presented herewith for qunching the curiosity of scholars about the commentary.

शुक्लयजुर्वेदः - ऋजुभाष्यम्

एकोनत्रिंशोऽध्यायः ।

समिद्धो अञ्जन्कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः ।
वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥ १ ॥

ॐ नमो श्रीगणेशाय नमः ॥

एकादशी त्रिष्टुप् ।*.....(damaged)[आप्त्यो नाराशंसः]

कथ्यो वामकथ्यो देव्योऽश्वो(बृहदुक्थो वामदेव्योऽश्वो) वा सामुद्रिरपश्यत् । अश्वस्तुतिः । आश्वमेधिको.....(damaged) यः [प्रागाग्नेयः] कृष्णग्रीव इति यावत् । हे भगवन्नग्ने समिद्धः संदीप्तः । समस्तं जगत् .....(damaged) [अञ्जन् व्यक्तीकुर्वन्] विशिष्टस्त्वं कृदरं मतीनां घृतं मधुमत्पिन्वमानः । मम नाम ग्रहीष्यतीत्ये.....(damaged)वतानां [तन्मतीनां विद्यावतां] कृदरमापन्नं प्राप्तं घृतं मधुमत् स्वादुमत् पिन्वमानः । आत्मानं प्रति.....(damaged)[सिञ्चन् स्वेच्छया पानं] कुर्वन् वाजिनं वहन् अतस्त्वं वाजी । हे जातवेदः देवानां सधस्थं सहस्थानं प्रियं घृतं .....(damaged) [वक्षि वह] प्रापय ॥ १ ॥

घृतेनाञ्जन्सं पथो देवयानान्प्रजानन्वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशः सचन्ता ँ स्वधामस्मै यजमानाय धेहि ॥ २ ॥

---

* Damaged portion restored with the help of Uvaṭa's commentary.

अत्र द्वितीयोऽर्धर्चः पूर्वं व्याख्यायते । हे सप्ते सरण प्रदिशः प्रतिदिशां त्वाम् । द्विपदचतुःपदाश्रयाणि भूतजातानि अनुसचन्तां सेवताम् । किं च स्वधामन्नं अस्य यजमानस्य धेहि प्रयच्छ । किं कुर्वन् । देवयानान् पथः वाजी घृतेन समञ्जन् तत्तेजयन् । पुनः किं कुर्वन् । प्रजानन् अप्येतु अप्येहि । अत्र पुरुषव्यत्ययः । हवींषि देवयानाः पन्थानः उच्यन्ते ॥ २ ॥

ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वहिं वहतु जातवेदाः ॥ ३ ॥

हे वाजिन्, सप्ते जातवेदा अग्निः त्वां देवैर्वसुभिश्च सजोषाः समानप्रीतिः प्रीतं आप्रीतं वहिं वोढारं वहतु प्रापयतु । यतः त्वम् ईड्यः असि स्तुत्योऽसि वन्द्यश्च । आशुः शीघ्रः असि मेध्यश्च पवित्रोऽसि ॥ ३ ॥

स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥ ४ ॥

हे अग्ने पृथिव्यां वेद्यां प्रथमानं बर्हिः स्तीर्णं सुष्टरीम साधु स्तृणाम यज्ञगृहद्वाररूपं कृण्वाना कुर्वाणा । जुषाणामि[णा इति]विभक्तिव्यत्ययः । जुषाणः सेवमानः तन्त्वं स्तीर्यमाणं कुरु । उरुत्वे स्तीर्णं पृथु पृथुलं देवेभिर्युक्तम् । किं च हे अग्ने ते अदितिर्देवमाता सजोषाः सह प्रीयमाणा सती स्योनं मुखं यज्ञगृहद्वाररूपं कृण्वाना कुर्वाणा । सुविते सुइते सुगते गतिकर्मप्रजीवा यद्दधातु स्थापयतु ॥ ४ ॥

एता उ वः सुभगा विश्वरूपा विपक्षोभिः श्रयमाणा उदातैः ।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥ ५ ॥

हे ऋत्विग्यजमानाः, वः युस्माकं एता द्वारदेव्यः सुप्रायणाः सुप्रगमनाः भवन्तु । किंलक्षणाः सुभगाः विश्वरूपाः । अनेकरूपविचित्रिताः । विपक्षोभिः श्रयमाणाः पक्षोभिर्विस्तीर्यमाणाः पक्षाभ्यामुदितैरूद्ध्वमायातैः सततागमनैर्विश्रयन्ता इत्यनुषङ्गः । ऋष्वाः महत्यः सतीः सत्यः कवषः कुषिताः शुम्भमानाः आत्मानं शोभयन्त्यः ॥ ५ ॥

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभिसंविदाने ।
उषासा वाᳬ सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि ॥ ६ ॥

हे उषासा । नक्तोषासौ वां युवयोः द्वे दम्पती पत्नीयजमानौ इह ऋतस्य यज्ञस्य योनौ सादयामि स्थापयामि । किंलक्षणे दम्पती ? सुहिरण्ये साधु हिरण्यालंकृते सुशिल्पे साध्वन्योन्यं प्रतिरूपे । किंलक्षणे उषासा । द्विवचनोपदेशात्साहचरितत्वाच्च द्वितीया रात्रिः । अतो नक्तोषासौ अन्तरा मित्रावरुणा चरन्ती । अन्तरा मध्येन मित्रावरुणा चरन्ती । अयं वै लोको मित्रोऽसौ वरुणः । द्यावापृथिव्योर्मध्येन चरन्त्यौ । यज्ञानां मुखं अभिसंविदाने यज्ञस्य मुखमग्निहोत्रं तस्य कालं प्रथमं कथ्ययन्त्यौ उत्तिष्ठतायमग्निहोत्रहोमकालः सम्प्राप्त इतीव लक्ष्यते ॥ ६ ॥

प्र॒थमा वां ९ सर॒थिना॑ सु॒वर्णा॑ दे॒वौ पश्य॑न्तौ॒ भुव॑नानि॒ विश्वा॑ ।
अपि॑प्र॒यं चोद॑ना वां॒ मिमा॑ना॒ होता॑रा॒ ज्योतिः॑ प्र॒दिशा॑ दि॒शन्ता॑ ॥ ७ ॥

हे नक्तोषासौ वां युवयोः विषये तौ दम्पती । आहवनीयाख्यं ज्योतिर्यष्टव्यम् । प्रदिशा साभिनयेन श्रुतिवाक्येन दिशां तौ प्रकथयन्तौ आसात इति वाक्यशेषः । पुनः दम्पती यजमानौ वां युवयोः चोदनाप्रमाणकं कर्ममिमाना निर्ममाणौ होतारौ । एवं मध्यस्थतया भुवनानि भूतजातानि विश्वानि सर्वाणि अपिप्रयम् । प्रीणातेरेतद्रूपं प्रीणितवानहमस्मि इत्यध्वर्युः । किंलक्षणौ तौ प्रथमौ होतारौ सारथिनौ एकरथ्यारूढौ सुवर्णौ शोभनवर्णौ देवनादिगुणयुक्तौ पश्यन्तौ प्रेक्ष्यमाणौ ॥ ७ ॥

आ॒दि॒त्यैर्नो॒ भार॑ती वष्टु य॒ज्ञꣳसर॑स्वती स॒ह रु॒द्रैर्न॑ आवीत् ।
इडोप॑हूता॒ वसु॑भिः सु॒जोषा॑ य॒ज्ञं नो॑ देवीर॒मृते॑षु धत्त ॥ ८ ॥

नः अस्माकं यज्ञं देवीः तिस्रो देव्यः । अमृतेषु देवेषु धत्त दधत्विति पुरुषव्यत्ययः । कास्ता नः अस्माकं यज्ञं आदित्यैः सहिता भारती वष्टु कामयताम् । पुनः नः अस्मान् सरस्वती सह रुद्रैः आवीत् अवतु । इडा च उपहूता कृतोपह्वा । वसुभिः सजोषा समानप्रीतिः अस्मान् अवत्विति वाक्यशेषः ॥ ८ ॥

त्वष्टा॑ वी॒रं दे॒वका॑मं जजान॒ त्वष्टु॒रर्वा॑ जायत आ॒शुरश्वः॑ ।
त्वष्टे॒दं विश्वं॒ भुव॑नं जजान ब॒होः क॒र्तार॑मि॒ह य॑क्षि होतः ॥ ९ ॥

हे होतः इह त्वष्टारं यज यक्षि । किंलक्षणम् । बहोः भूतग्रामस्य कर्तारम् । यश्च त्वष्टा इदं सर्वं विश्वं भुवनं भूतजातं जनयति । यस्त्वष्टा वीरं पुत्रं देवकामं ऋणत्रयमपाकरणसमर्थं जजान जनयति । यस्माच्च त्वष्टुः अर्वा अरणः अश्वः आशुः शीघ्रः जायते ॥ ९ ॥

अश्वो॑ घृ॒तेन॒ त्मन्या॒ समक्त॒ उप॑ दे॒वाँ २ ऋ॑तु॒शः पाथ॑ एतु ।
वन॒स्पति॑र्देवलो॒कं प्र॑जा॒नन्न॒ग्निना॑ ह॒व्या स्व॑दि॒तानि॑ वक्षत् ॥ १० ॥

अश्वः घृतेन समक्तः समुक्षितः ऋतुशः ऋतावृधः पाथः अन्नं भूत्वा त्मन्या आत्मना स्वयमेव देवान् प्रति उपैतु उपगच्छतु । ननु कथं देवलोकमजानन्नश्वो देवान् प्रत्ययादित्यत आह । वनस्पतिरग्निना मित्रेण देवलोकं प्रजानन्नश्वस्य दर्शयतु हव्या हवींषि स्वदितानि मृष्टीकृतानि देवान् प्रति वक्षत् वहतु ॥ १० ॥

प्र॒जाप॑ते॒स्तप॑सा वावृधा॒नः स॒द्यो जा॒तो द॑धिषे य॒ज्ञम॑ग्ने ।
स्वाहा॑कृतेन ह॒विषा॑ पुरोगा या॒हि सा॒ध्या ह॒विर॑दन्तु दे॒वाः ॥ ११ ॥

हे अग्ने प्रजापतेस्तपसा वावृधानः वर्धमानः सद्यो जातः सन् यज्ञं दधिषे धारयसि । अतस्त्वां ब्रवीमि । स्वाहाकृतेन हविषा स्वाहाकारोपलक्षितेन हविषा पुरोगाः । पुरोगामितया हि साध्या हविरदन्तु देवाः । देवाः साधु हविः अदन्तु । साधुशब्दस्य विभक्त्यादि लोपः ॥ ११ ॥

यदक्र॑न्दः प्रथ॒मं जाय॑मान उ॒द्यन्त्स॑मु॒द्रादु॒त वा॒ पुरी॑षात् ।
श्ये॒नस्य॑ प॒क्षा ह॑रि॒णस्य॑ बा॒हू उ॑प॒स्तुत्यं॒ महि॑ जा॒तं ते॑ अर्वन् ॥ १२ ॥

त्रयोदशस्त्रिष्टुभोऽश्वाभिष्टवः । हे अर्वन्नश्व प्रथमं जायमानः सन् । यत् अक्रन्दः । हेषाशब्दं अकार्षीत् यश्च त्वं समुद्रात् अन्तरिक्षात् पार्थिवाद्वा समुद्रात् पुरीषादन्यस्माद्वा उद्यन् उद्गच्छन् श्येनस्य पक्षा हरिणस्य बाहू अजैषीः । श्येनपक्षौ शीघ्रतया अजैषीः । हरिणस्य बाहू शीघ्रतया अजैषीः । अतस्ते तत्र ऋषिभिः उपस्तुत्यं स्तवनीयं महि महत् जातं उत्पन्नम् ॥ १२ ॥

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥ १३ ॥

अत्र चतुर्थपादप्रभृति व्याख्या । हे वसवः यूयं सूरादादित्यमण्डलात् अश्वं निरतष्ट । निरतिष्टतिः करोतीति कर्मा । य इत्थंभूतोऽश्वस्तं स्तुमः इति शेषः । आदित्यमण्डलान्निष्कृष्य कृतवन्तम् । यमेन दत्तं त्रित एनमायुनक् त्रितः त्रिस्थानो वायुः एनं आयुनक् आयुक्तवान् । इन्द्र एनं प्रथमो अध्यतिष्ठत् । गन्धर्वो विश्वावसुः अस्य रशनामगृभ्णात् अगृह्णात् इति ॥ १३ ॥

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ १४ ॥

हे अर्वन्, अश्व, यमः असि । आदित्यः असि । त्रिस्थानः इन्द्रः गुह्येन गुप्तेन व्रतेन कर्मणा भवसि । सोमेन समयामध्यतः विपृक्त एकीभूतः एताभिर्देवताभिस्तत्र सायुज्यं संजातमित्यभिप्रायः । किं च आहुस्ते तव त्रीणि दिवि बन्धनानि दिवि द्युलोके आदित्यात्मनावस्थितस्य त्रीणि बन्धनानि ऋग्यजुःसामलक्षणानि मण्डलान्तरं पुरुषा हवींषि ॥ १४ ॥

त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तःसमुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥ १५ ॥

त्रीणि त आहुर्दिवि बन्धनानि व्याख्यातम् । हे अर्वन् अश्व यत्र ते तव परमं जनित्रं जन्म वायुरूपेण आहुः । हे अर्वन्, त(उ)त मे मम वरुणः छन्त्सि छन्दतिरर्चतिकर्मा । शंसति कथयति । ते तव आसु त्रीणि बन्धनानि । कृषिर्वृष्टिर्बीजम् । त्रीणि अन्तःसमुद्रे । समुद्रशब्देनान्तरिक्षमभिधीयते । उत अपि च । तत्रापि तव त्रीणि बन्धनानि मेघो विद्युत् स्तनयित्नुरिति ॥ १५ ॥

इमा ते वाजिन्नवमार्जनानीमा शफानां ९ सनितुर्निधानां ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥ १६ ॥

हे वाजिन् अश्व, ते तव इमानि मार्जनानि अव रक्ष ये त्वया अवमार्जनं कृतम् । इमानि च शफानां खुराणां सनितुः संभक्तुः पादवासस्य निधानानि । यत्र पादवासप्रभृतीनि धीयन्ते । सर्वमहमपश्यम् । अपि च अत्र ते तत्र भन्द्रा भन्दनीया स्तुत्या रशना अहमपश्यम् । याः ऋतस्य यज्ञस्य गोपाः गोपायितव्या अभिरक्षन्ति । अथेदानीं भविष्यत्कालकर्मभिरभिष्टौति ॥ १६ ॥

आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥ १७ ॥

हे अर्वन्, ते तव पशुसंस्पर्शनोत्तरकालं ते तव आत्मानं दिव्यमनसा आरात् दूरे अजानाम् जानामि । आख्यातमेवत (मेतद्) अनुदात्तत्त्वात् तिङः तिङ्निपातः । ननु षष्ठीबहुवचनं अवशब्दस्य अधस्तात् । दिवा दिवं प्रति पतयन्तं उत्पतन्तम् । पुनः किं पतङ्गं आदित्यरूपिणं पुनरहं तव शिरः अपश्यम् । किंलक्षणं शिरः । पतत्रि उत्पतनशीलं पथिभिः मार्गैः सुगेभिः सुगमनै अरेणुभिः उपद्रवरहितैः जेहमानं गच्छन्तम् ॥ १७ ॥

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानडादिद्ग्रसिष्ट ओषधीरजीगः ॥ १८ ॥

हे अश्व, पृथिव्यां वर्तमानः इषः अन्नानि औषधीः अजीगः ग्रस्तासि गिरसि । आ ईषत् । हे अर्वन् ते तव पदे द्युलोके उत्तमरूपं अपश्यं पश्यामि । अतः देवलोकं प्रति प्रार्थये । जिगीषमाणं जेतुमिच्छन्तम् । इषः अन्नानि इच्छन्तम् । गोः गन्तुकामस्य तव एवं तावत् द्युलोकावस्थितस्याहं उत्तमं रूपमपश्यं पश्यामि । यदा ते तव पृथिवीस्थितस्य पुनः मनुष्यः अनुभोगमानट् व्याप्नोदित्यर्थः । इदिति पादपूरणार्थः । ओषधीः आइषत ग्रसिष्टः ग्रसिष्टतमः अतिशयेन भक्षयितान् अजीगः गिरसि वाहितः चलितुमपि न शक्नोति । त्वं तु वीर्यवत्तरो भवसीत्यभिप्रायः ॥ १८ ॥

अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥ १९ ॥

अन्वित्यपरभावमाचष्टे । हे अर्वन्, यस्य सुकृतिनः त्वं गृहे चेष्टसे । तस्य त्वामनु रथः चेष्टते । मर्यो मर्त्यो मनुष्यश्चेष्टते । अनु गावश्चेष्टन्ते । पुनस्त्वामनु कनीनां कन्यानां भगः सौभाग्यं चेष्टते । किं च । अनुव्रातासस्तव सख्यं ईयुः । तव सखिभावं अनुव्राताः पुरुषसंघा अपि सख्यं ययुः । किं चान्यद्बहु वदामः । अनु देवा ममिरे वीर्यं ते देवाः । वीर्यं वीर्यवत्तरं ते तव कर्म अनुममिरे । अचिन्त्यशक्तित्वमित्यभिप्रायः ॥ १९ ॥

हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥ २० ॥

हिरण्यशृङ्गस्थानीयमस्येति हिरण्यशृङ्गः । तं अश्वं वयं स्तुमः । यस्य अयः पादाः लोहमया अश्वावयवा मनोजवाः । यस्य त्वं इन्द्रः अवर आसीत् अभवत् । देवाः आप्नुवन् वायुरूपेणाश्वस्याद्यं हविरद्य[मा]ज्यं हविर्लक्षणं आयन् आगच्छन् । य इन्द्रः अर्वन्तं प्रथमो अधि अतिष्ठत् ॥ २० ॥

ईर्मान्तासः सिलिकमध्यमासः सꣳ शूरणासो दिव्यासो अत्याः ।
हꣳसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥ २१ ॥

आदित्यस्य रथे येऽश्वा युक्तास्तद्द्वारेणायमश्वः स्तूयते । ईर्मान्तासः ईर्मान्ता एव ईर्मान्तासः । तेषां हि सप्तानां मध्ये ये अश्वाश्चत्वारः समीरितान्ताः विक्षिप्तान्ता विसृता विरला इत्यर्थः । पृथवोन्ता पृथूरस्का पृथुजघना-

श्रेत्यर्थः । सिलिकमध्यमासः संश्लिष्टमध्यमा इत्यर्थः । तेषां हि सप्तानां ये मध्यमास्त्रयस्ते इतरेतरमुत्पीड्य संश्लेषेणावस्थिताः । अथवा पृथुजघनोरस्कानां सतां मध्यमाः शरीरप्रदेशाः सप्तानामपि संश्लिष्टाः संलग्नाः सन्तः । निरुदरास्ते अश्वाः । सꣳशूरणाः शूरेण भगवतादित्येन प्रेरिताः दिव्यासः दिविजाः । अत्याः अतनाः । ब्राह्मं सहस्रयुगपर्यन्तं सकृद्युक्ताः ये इत्थंभूता अश्वा दिव्यं दिविभवं यत् अज्मं अजिनं आक्षिषुः । 'अशूङ् व्याप्तौ' (पा.धा.१३४६) धातोः प्रयोगः । व्याप्नुवन्ति । के इव हंसा इव । यथा हंसाः श्रेणीभूताः एकया रीत्या गमनाय प्रयत्नं कुर्वन्त्येवमश्वा अपि ॥ २१ ॥

तव शरीरं पतयिष्ण्वर्वन् तव चित्तं वात इव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥ २२ ॥

हे अर्वन्, तव पुरुत्रा बहुधा विद्युच्चन्द्रार्काग्न्यादिषु अरण्येषु विष्ठितानि विविधं स्थितानि जर्भुराणानि देदीप्यमानानि चरन्ति । कथमित्यपेक्षायां तव शरीरं पतयिष्णु उत्पतनशीलं तव चित्रं वात इव ध्रजीमान् गतिमान् तव शृङ्गाणि ज्वलन्नामसु पठितम् ॥ २२ ॥

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥ २३ ॥

वाजी अर्वा शसनं विशसनं उपप्रागात्प्राप्तः । देवद्रीचा देवान् प्रति अञ्चितेन मनसा दीध्यानः । हिरण्यगर्भपदं दीध्यमानः ध्यायन् । किं च अस्याश्वस्य अजो नाभिः पुरः नीयते । यत्र अनु पश्चात् कवयः क्रान्तदर्शनाः । रेभाः स्तोतारो यन्ति गमयन्ति ॥ २३ ॥

उप प्रागात्परमं यत्सधस्थमर्वा २ अच्छा पितरं मातरं च ।
अद्या देवान्जुष्टतमो हि गम्या अथाशास्ते दाशुषे वार्याणि ॥ २४ ॥

एवमश्वमभिष्टुत्याथेदानीं यजमानं कृतकृत्यतया सम्बोधयन्नाह । हे यजमान, अर्वान् अर्वाश्वः नकार उपसर्जनः । देवमनुष्याणां परमं सधस्थं सहस्थानं उपप्रागात् प्राप्तः । च अन्यत् । अद्य पितरं मातरं अच्छा अभ्यगात् । अपः (अथ) यजमानाय स्ववार्याणि वरणीयानि आशास्ते । हे यजमान, त्वां ब्रवीमि अद्य कृतकृत्यः सन् देवान् गम्याः गच्छेः जुष्टतमो हि प्रियतमो हि सन् । किंलक्षणाय यजमानाय हवींषि दत्तवते ॥ २४ ॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥ २५ ॥

द्वादशाप्रीस्त्रिष्टुभः भार्गवो जमदग्निरपश्यत् । हे जातवेदः, अद्य अस्मिन् यजनीये अहनि मनुषो दूरोणे यजमानानां यज्ञगृहे देवान् यजसि । अतस्त्वां ब्रवीमि । हे मित्रमहः मित्रपूजिता आ च वह आवह यजमानभूयस्त्वाद्वीप्सा बहुवचनं च । चिकित्वान् चेतनवान् परिदृष्टकारी । समिद्धः । त्वं दूतः सन् कविरसि प्रचेताः प्रवृद्धचेताः ॥ २५ ॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरं नः ॥ २६ ॥

हे तनूनपात् अग्नेराज्यस्य वा संबोधनं गवामपां च पौत्र क्रतस्य यज्ञस्य पथः मार्गान् यानान् मध्वा स-मञ्जन् मधुरसेनाज्येन समञ्जन् संभक्षयन् स्वदय रोचय । हे सुजिह्व कल्याणजिह्व । नः अस्माकं यज्ञं च देवत्रा कृणुहि देवान् प्रति गमय उत अपि च किं कुर्वन् मन्मानि मननानि अस्माकं धीभिर्यज्ञमृन्धन् यज्ञं क्रतुं समर्थयन् । नानादेवत्यानि हवींष्यभ्यवहरन् । यज्ञमार्गो हविः । हविर्भिर्यज्ञो याति चलति । तनूनपाच्छब्दः द्विरुदात्तः । आमन्त्रितत्वादाद्युदात्तः ॥ २६ ॥

नराशꣳसस्य महिमानमेषामुपस्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥ २७ ॥

नराशंसो यज्ञः नरा अस्मिन्नाशीनां शंसन्तीति नराशंसः । तस्य नराशंसस्य अथवा अग्निनैरैः प्रशस्यो भवतीति । नराशंसो यज्ञः । एषां देवगणानां मध्ये नराशंसस्य महिमानं उपस्तोषाम उपस्तुमः । यज्ञैराहुतिभिर्यजतस्य यष्टव्यस्य तेऽस्य महाभाग्यस्य ये देवाः सुक्रतवः सुकर्माणः । शुचयः निषक्तपाप्मनः अणिमाद्यैर्युक्ता धियंधा जातप्रज्ञानाः । उभयानि हव्यानि हवींषि सोमं चेतराणि स्वदन्ति भक्षयन्ति ॥ २७ ॥

आजुह्वान ईड्यो वन्द्यश्चायाह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एतान्यक्षीषितो यजीयान् ॥ २८ ॥

हे अग्ने हे जि(य)ह्व वसुभिः सजोषाः समानप्रीतिः सना याहि । यतस्त्वं देवानां होतासि । अतः स एनान् देवान् यक्षि यज आजुह्वानः आहूयमानः ईड्यः स्तुत्यः वन्द्यश्च भवसि । ईषितः प्रेषितः यजीयान् य[ष्ट्]तरः ॥ २८ ॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्ने अह्नाम् ।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ २९ ॥

प्रदिशा श्रुतिवाक्येन प्रागग्रं बर्हिः स्तृणाति । अग्ने अह्नां पूर्वाह्णे पृथिव्या वस्तोरस्या वेद्यवसानाच्छादनं बर्हिः प्रवृज्यते । प्रवृज्यमानं विप्रथते विविधमाच्छादयति । उकारः पादपूरणः । वितरमतितरां वरीयः वरतरम् । किं पुनः कार[ण]मपेक्ष्य प्रवृज्य इत्य[त]आह । देवेभ्यश्च अदितये च मु(सु)खं क[र्तुम्]इति शेषः ॥ २९ ॥

व्यचस्वतीरुर्विया विश्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ३० ॥

यज्ञगृहद्वारोऽभिधेयाः । हे व्यचस्वत्यः गमनवत्यः उर्विया उरुत्वेन विश्रयन्ताम् । विवृतं विश्रयध्वं कथमिव । पतिभ्यो न जनयः शुम्भमानाः । यथा मैथुनधर्मेण पतिभ्यो अर्थाय जायाः आत्मानं शोभयं व्यऊरु विश्रयेयुः । विवृतौ कुर्वन्ति । यथा हि मण्डिता जाया पतिं उपसर्पति तथेतराः । अत एवोक्तं पतिभ्यो न जनयः शुम्भमानाः विवृता भूत्वेत्यर्थः । नकारोऽयमुपमानार्थः । हे देव्यः द्वारः बृहत्यः विश्वमिन्वाः विश्वमभिर(ए)ति देवेभ्य ऋत्विग्यजमानेभ्यः सुप्रायणाः सुप्रगमनाः भवत ॥ ३० ॥

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं ९ शुक्रपिशं दधाने ॥ ३१ ॥

हे यज्ञगृहद्वारशाखे योनौ यज्ञगृहे आसीताम् । किंलक्षणे आसुष्वन्ती । स्वर्य(स्मय)तेर्वा स्वपतेर्वा निरुपसर्गात् रूपम् । स(सं)स्मीयमाने परस्परं हसन्त्यौ साधुस्वपन्त्यौ वा परस्परम् । यजते यज्ञिये । उपाके उपयाक्रान्ते परस्परम् । एकदेशबलीभूते उषासानक्ता उषा प्रातः नक्ता रात्रिः । दिव्यो दिविभवे । जो(यो)षणे प्रीतिमत्यौ । स्त्रीरूपिण्यौ वा । बृहती बृहत्यौ सुरुक्मे सुरोचने । शुक्रपिशं अधिश्रियं दधाने स्थापयत्यौ । उद्गच्छतः शुक्ररूपिणीं कपिशां श्रियं संदधाने ॥ ३१ ॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ ३२ ॥

तौ अस्मदीयं यज्ञं प्रसाधयतामिति शेषः । तौ कौ यौ देव्या होतारौ । अयं चाग्निरसौ च मध्यमः प्रथमौ आज्यरूपौ । सुवाचौ अग्निः[मि]माना यज्ञं निर्ममाणौ मनुषो यजध्यै । मनुषः वीप्सालोपः । मनुष्यस्य यज्ञेषु विद[थे]षु अन्यान् ऋत्विजः यजध्यै । यजनाय प्रचोदयन्तौ । प्राचीनं पूर्वस्यां हि आहवनीयाख्यं ज्योतिर्यष्टव्यमिति । प्रदिशा अभिनयेन श्रुतिवाक्येन वा दिशन्ता प्रकथयन्ता वासाते । कारू स्वयं च कर्तारौ ॥ ३२ ॥

आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेद ९ स्योन ९ सरस्वती स्वपसः सदन्तु ॥ ३३ ॥

नः अस्माकं यज्ञं भारती (lacuna)[तूयं क्षिप्रं आ] एतु । आकारः एतु अनेन संबध्यते । एतु इडापि मनुष्यत् यज्ञं एतु । .....(lacuma)[सरस्वती च] या इत्थंभूतास्तिस्रो देव्य इह चेतयन्ती चेतयन्त्यः । आ इदं बर्हिः स्योनं मु(सु)खरूपं स्वपसः । साधु कर्मणि आसदन्तु आसीदन्तु ॥ ३३ ॥

य इमे द्यावापृथिवी जनित्री रूपैरपिं ९ शद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥ ३४ ॥

हे होतः, अद्य अस्मिन्नहनि तं देवं त्वष्टारं इह यक्षि यज स्वमधिकारं विद्वान् जानानः । यजीयान् यष्टृतमः । य इमे द्यावापृथिव्यौ सर्वेषां भूतानां जनयित्र्यौ रूपैः अपिंशत् विचित्रिते अकरोत् । पुनस्त्वष्टा भुवनानि भूतजातानि विश्वा विश्वानि रूपैरावृतान्यकरोत् ॥ ३४ ॥

उपावसृज त्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥ ३५ ॥

हे होत, उपश्लिष्टं पाशुकं अवदानम् । त्मना आत्मना अवसृज निक्षिप । मन्त्रेष्वात्मन इत्याकारलोपः । किं कुर्वन् देवानां पाथः अन्नं हवींषि । ऋतुथा ऋतावृतौ समञ्जन् संप्रयक्षन् निक्षिप । तद्धव्यं मधुना घृतेन युक्तं वनस्पतिः शमिता देवो अग्निः स्वदन्तु ॥ ३५ ॥

स॒द्योजा॒तो व्य॑मिमीत य॒ज्ञम॒ग्निर्दे॒वानाम॑भवत्पुरो॒गाः ।
अ॒स्य होतुः॑ प्र॒दिश्यृ॒तस्य॑ वा॒चि स्वाहा॑कृत ँ ह॒विर॑दन्तु दे॒वाः ॥ ३६ ॥

अग्निः सद्योजातः सन् यज्ञं विमिमीत निरमिमीते । देवानां पुरोगा अभवत् । अग्निः अग्रतो गामी सर्वकार्येषु । अस्याग्नेर्होतुः प्रदिशि प्राच्यां दिशि ऋतस्य गतस्य आहवनीयात्मनास्थितस्य वाचि आस्ये मुखे वा स्वाहाकृतं स्वाहाकृत्युपलक्षितं हविः देवा अदन्तु भक्षयन्तु ॥ ३६ ॥

के॒तुं कृ॒ण्वन्न॑के॒तवे॒ पेशो॑ मर्या अपे॒शसे॑ ।
समु॒षद्भि॑रजायथाः ॥ ३७ ॥

इत उत्तरं अश्वस्य रक्षिणः पुरुषस्यापेक्षितोपकरणानि च स्तूयन्ते । हे अग्ने, उषद्भिः 'उष दाहे' (पा.धा. ७४२) उषद्भिः । अग्निहोत्रादिकर्माणि कुर्वद्भिः अजायथाः उत्पन्नः । किं कुर्वन् । केतुं कृण्वन् अकेतवे केतुं प्रज्ञानं कृण्वन् कुर्वन् पेशः सुवर्णं रूप्यं वा मर्याः । अत्र विभक्तिव्य[त्य]यः । मर्याय मनुष्याय अपेशसे अविद्यमानसुवर्णाय अविद्यमानरूपा(प्या)य पेशः सुवर्णं रूपं(प्यं) वा कुर्वन् । अकेतवे न विद्यते केतु प्रज्ञानं यस्य स अकेतुः तस्मै ॥ ३७ ॥

जी॒मू॒तस्येव भवति॒ प्रती॑कं॒ यद्व॒र्मी याति॑ स॒मदा॑मु॒पस्थे॑ ।
अना॑विद्धया त॒न्वा॒ जय॒ त्व ँ स त्वा॒ वर्म॑णो महि॒मा पि॑पर्तु ॥ ३८ ॥

भारद्वाजः संग्रामान्पृक्षा(न्यपक्षान्)स्तौति । स वर्मणो महिमा त्वां पिपर्तु पालयतु । कस्मिन् काले कस्य चेत्यत आह । स समदां संग्रामाणां उपस्थे उत्सङ्गे प्रतीकमुद्दिश्य वर्मी योद्धा याति गच्छति । हस्त्यश्वरथपदातिसगम्भीरतूर्यनिनादशरजलनिकरैरसह्यं प्रतीकं कस्येव । जीमूतस्येव भवति प्रतीकं जीमूतो मेघः प्रतीकमनीकं मुखमिति पर्यायः । यथा मेघस्य मुखं विद्युत्स्फुरति स्तनयित्नुधरानिकरैरसह्यं भवति । हे वर्मिन्, त्वं तन्वा जय । अनाविद्धया न आविद्धा अनाविद्धा तया अक्षतया ॥ ३८ ॥

धन्व॑ना॒ गा धन्व॑ना॒जिं ज॑येम॒ धन्व॑ना तीव्रा॒ः समदो॑ जयेम ।
धनु॒ः शत्रो॑रपका॒मं कृ॑णोति॒ धन्व॑ना॒ सर्वाः॑ प्र॒दिशो॑ जयेम ॥ ३९ ॥

धनुःस्तुतिः । धन्वाना धनुषा गाः पृथिवीः जयेम । धनुषा च आजिं मार्गं जयेम । धनुषा च तीव्राः पटवः उद्गूर्णायुधाः समदः संग्रामाञ्जयेम । द्वितीयार्थे प्रथमा व्याख्यायते । धनुश्च शत्रोः कामं अपकृणोतु । धन्वना धनुषा सर्वाः प्रदिशः जयेम । 'ऊधसोनङ् धनुषश्च'(पा.सू.५.४.१३१-१३२)इत्यनङादेशः ॥ ३९ ॥

व॒क्ष्यन्ती॒वेदाग॑नीगन्ति॒ कर्णं॑ प्रि॒य ँ सखा॑यं परिषस्वजा॒ना ।
योषे॑व शिङ्क्ते॒ वित॒ताऽधि॒ धन्व॒न्ज्या इ॒य ँ सम॑ने पा॒रय॑न्ती ॥ ४० ॥

ज्याभिधेया । या ज्या धन्वं वितता प्रसारिता अधि उपरि धनुषि निबद्धा । सेयं समने संग्रामे पारयन्ती जयं कुर्वती संग्रामानुत्तारयन्ती स्तूयते । धानुष्केणाकृष्यमाणा कर्णमूलं यावत् वक्षन्ती । आगनीगति आगच्छति

अत्यर्थमागच्छति । इत् शब्दः पादपूरणः । प्रियं सखायं इषुं योषेव परिषस्वजाना आलिङ्गयन्ती । पुनर्योषेव शिङ्क्ते । 'शिजि अव्यक्ते शब्दे' (पा.धा.१०९९) । यथा विदग्धा योषित्कामुकरञ्जनार्थं अव्यक्तं कूजितादिकं शब्दं करोति । एवमिति ॥ ४० ॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून्विध्यता ९ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥ ४१ ॥

धनुषः कोटी स्तूयन्ते(ते) । त्रिष्टुप् । हे योषे योषा इति विभक्तिव्यत्ययः । समनेव समनेन मनस्केव समानभर्तृगतमनस्के इव । इमं धनुष्कं उपस्थे उत्सङ्गे मातेव पुत्रं बिभृतां धारयताम् । पुनरिमे शत्रून् अमित्रान् अपविध्यतां आचरन्ती धानुष्कं उपकान्त्यौ संविदाने सुखमनुभवन्त्यौ । आर्त्नी अटन्यौ ॥ ४१ ॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्य ।
इषुधिः संकाः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ ४२ ॥

इषुधिः स्तूयते । स इषुधिः समनाः संग्रामान् अवगत्य ज्ञात्वा धनुषः निःक्रम्यमाणां वि(चि)श्चेत्येवं शब्दं कृणोति करोति । धनुष्मता पृष्ठे निनद्धः प्रसूतो जयति । संकाः शत्रुसंघाताः पृतनाः संग्रामभक्तीः सर्वाः । किंलक्षणः इषुधिः संकीर्यन्ते । अस्मिन्योद्धा इति संकाः बह्वीनां पिता इषूणां पालता । तेन हि इषवः पाल्यन्ते । बहुः इषुकलापः । अस्य पुत्रः पुत्रस्थानीयः सहितेन इषुकलापेन त्रायते बहुत्वात्तदर्थं हितं कुर्वन्तीति भावः ॥ ४२ ॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनुयच्छन्ति रश्मयः ॥ ४३ ॥

जगती अर्धेन सारथिः अर्धेन रश्मयः स्तूयन्ते । यः सुसारथिः रथे तिष्ठन् यत्र यत्र कामयते पुरो वाजिनोऽश्वान् पुरोऽग्रतोऽवस्थितान् । नयति प्रापयति तं स्तुम इति शेषः । हे जनाः, अभीशूनां प्रग्रहणानां च महिमानं महाभाग्यं पनायत पूजयत । येषां अश्वसंबन्धिरश्मयः पश्चात्सन्तो मनः अनुगच्छन्ति । वशवर्ति कुर्वन्ति ॥ ४३ ॥

तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान्क्षिणन्ति शत्रूं १ रनपव्ययन्तः ॥ ४४ ॥

अश्वाः स्तूयन्ते त्रिष्टभा । अश्वाः तीव्रान् जय जयेति घोषान् शब्दान् कृणुते कुर्वन्ति । वृषपाणयः वृषाः पाणौ येषां संगृहीतप्रभृतीनां योक्तॄणां ते वृषपाणयः । रथेभिः रथैः सह वाजयन्तः पूजयन्तः प्रपदैरवक्रामन्तः । स्वामिनं अनपव्ययन्तः अपेत्यव्ययम् । अपव्ययन्तो नश्यन्तः न अपव्ययन्तः अनपव्ययन्तः अनश्यन्तः स्वामिनं अपरित्यजन्तः ॥ ४४ ॥

रथवाहणं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्म ९ संदेम विश्वाहा वय ९ सुमनस्यमानाः ॥ ४५ ॥

रथस्तुतिः त्रिष्टुप् । अस्यानसः शकटस्य रथवाहणं हविर्नाम । यत्र यस्मिन्नस्य योद्धुः वर्म सन्नहनं आयुधं विश्वाहा सर्वदा संग्रामान् जित्वा निहितम् । तत्र रथ उपसदे वाहने सुमनस्यमाना अनाकुलितचित्ता वयं रथं शग्मं उप सदेम उपसादयामः ॥ ४५ ॥

स्वादुष ५ सदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतो वीरा उरवो व्रातसाहाः ॥ ४६ ॥

रथगोपान् स्तौति त्रिष्टुप् । सतो वीराः शोभनस्य यजमानस्याश्वमेधयाजिनः सम्बन्धिनो वीराः तेऽस्माकं रथगोप्तारो भवन्त्विति शेषः । स्वादुष५ सदः स्वादु सुखकरं येषां सदनं ते स्वादुषदः । पितरः मातरः वयोधसः अन्नस्य आयुषो वा धारयितारः । कृच्छ्रेश्रितः क्लेशाश्रयिणः शक्तीवन्तः बलवन्तः आयुधवन्तो वा । गभीरा गम्भीरप्रज्ञानाः चित्रसेना विचित्रसेना इषुबलाः इषुषु विशेषतो बलं येषां ते । अमृध्राः अमृदवः उरवः पृथुजघनोरस्काः व्रातसाहाः व्रातगणा अभिभवितारः । ये इत्थंभूता तेऽस्माकं रथगोप्तारो भवन्तु ॥ ४६ ॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत ॥ ४७ ॥

जगती लिङ्गोक्तदेवता । हे ऋतावृधः सत्यवृधो देवाः नः अस्माकं रक्ष रक्षतेति वचनव्यत्ययः । माकिर्नो अघशंसः मा च कश्चित् नः अस्माकं कुले अघशंसः अघानि पापानि शंसतीति अघशंसः । ईशत ईष्टा भवत्प्रसादात् । ब्राह्मणासः पितरः सोम्यासः सोमसंपादिनः । शिवेन पान्तु नः अस्मान् द्यावापृथिवी अनेहसा अनुपहिंसिन्यौ अनपराधिन्यो वा पातं, च अन्यत् पूषा नः अस्मान् दुरितान् अशुभान् पातु रक्षतु ॥ ४७ ॥

सुपर्णं वस्ते मृगो अस्यादन्तो गोभिः संनद्धा पतति प्रसूता ।
यात्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म य ५ सन् ॥ ४८ ॥

द्वाभ्यां त्रिष्टुबनुष्टुभाभ्यां इषुः स्तौति । या इषुः । सुपर्णं वस्ते सुपर्णः पक्षी तस्य विकारः सौपर्णमेव भवति मृगोर्विकारैरस्याः इषोर्दन्तः । गोभिः श्लेष्मस्नायुभिः संनद्धा धनुष्मता प्रसूता प्रचोदिता शत्रुबलं प्रति पतति । यत्र यत्र नराः संच विच द्रवन्ति संगच्छन्ति तत्र तत्रास्मभ्यमिषवः शर्म शरणं यच्छन्तु प्रयच्छन्तु ॥ ४८ ॥

ऋजीते परिवृङ्ग्धि नोऽश्मा भवतु नस्तनूः ।
सोमो अधिब्रवीतु नोऽदितिः शर्म यच्छतु ॥ ४९ ॥

हे इषो ते तव ऋजुगामिनस्तनूरश्मा अश्ममयी परिवृङ्ग्धि परिवर्जय । च अन्यत् नः अस्माकं तनूरश्मा भवतु अश्ममयी भवतु नः अस्मान् जीवनाय सोमः अधि ब्रवीतु नः अस्माकं शरणं अदितिः शर्म यच्छतु । ददात्वित्यर्थः ॥ ४९ ॥

आजङ्घन्ति सान्वेषां जघनाँ २ उपजिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्समत्सु चोदय ॥ ५० ॥

अश्विकास्तुतिः । हे अश्वाजनि । अश्वानां जनी तस्याः संबोधनं हे अश्वाजनि तानश्वान्समत्सु संग्रामेषु जयाय चोदय प्रेरय । तान् कानित्यपेक्षायां येषामश्वानां प्रचेतसोऽश्वारोहा सानू सानूनि मांसोपचितानि अङ्गानि आजङ्घन्ति । पुनर्जघनान् जघनानि उपजिघ्नते उपजिघ्नन्ति ॥ ५० ॥

अहिरिव भोगैः पर्येति बाहुं ज्यायां हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परिपातु विश्वतः ॥ ५१ ॥

हस्तघ्नः स्तूयते । हस्तेऽवस्थिते हन्यते येनेति स हस्तघ्नः । अ(स)हस्तघ्नः पुमांसं अक्लीबं मां विश्वा वयुनानि जातप्रज्ञानि च विश्वतः सर्वतः परिपातु । किं लक्षणस्त्वं विद्वान् प्रजानन् । पुमान् शूरः अक्लीबः यस्त्वं सर्प इव भोगैः शरीरावयवैः बाहुं पर्येति परिवेष्टयति । ज्यायहेतिं परिबाधमानः ज्यायव-धात्परित्रायमाणः ॥ ५१ ॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ ५२ ॥

रथदुन्दुभिः । हे वनस्पते, ते तव रथे आस्थाता भव । जेत्वानि जेतव्यानि तवाङ्गानि जयतु । हे वीड्वङ्गो भूयाः । वीडुशब्दोदृग्वचनः । दृढाङ्गो भव । अस्मत्सखा सन् प्रतरणः प्रतरन्त्यनेन संग्रामानिति प्रतरणः । सुवीरः साधुवीरः । गोभिः संनद्धः गोविकारैः श्लेष्मचर्मभिः संनद्धोऽसि । अतस्त्वां ब्रवीमि आत्मानं वीडयस्व संस्तम्भयस्वेति ॥ ५२ ॥

दिवः पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतꣳ सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज ॥ ५३ ॥

दिवः द्युलोकात् तदोजः परि सर्वतः उद्भृतम् । पृथिव्याः पृथिवीलोकात् च यदोजः परिउद्भृतं यच्च वनस्पतिभ्यः सकाशात् परि सर्वतः सहः बलं आभृतं आहितम् । यच्च अपां सम्बन्धि परि सर्वतः ओज्मानं तेजः । एवं परिमाणं तेजच(श्च)तुष्टयं रथभावं नीतं परि गोभिरावृतम् । परि समन्तात् गोभिर्विकारैः स्नायुश्लेष्मचर्मभिरावृतं उपनिबद्धं इन्द्रस्य वज्रम् । 'इन्द्रोह यत्र वृत्राय वज्रं प्रजहार' (श.ब्रा.१.२.४.१) इत्युपक्रम्य 'रथस्तृतीयं वा'(श.ब्रा.१.२.४.१) इत्याभिधाय 'रथेन च शरेण च राजन्यबन्धव' (श.ब्रा.१.२.४.२) श्रुतेस्तदभिप्रायमेतत् हविषा रथं यज ॥ ५३ ॥

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रतिहव्या गृभाय ॥ ५४ ॥

हे देवरथ प्रतिहव्या प्रतिग्रह हवींषि गृभाय गृहाण । पुनः किंलक्षणः स इमां नः अस्माकं हव्यदातिं हविषो दानं जुषाणः सेवमानः । त्वं इन्द्रस्य वज्रोऽसि । मरुतां च अनीकं मुखमसि । मित्रस्य गर्भोऽसि वरुणस्य नाभिरसि ॥ ५४ ॥

उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अपसेध शत्रून् ॥ ५५ ॥

हे दुन्दुभे सजूः समानप्रीतिः सन् इन्द्रेण देवैः सह सजूः समानप्रीतिः सन् शत्रून् दूराद्दवीयः दूराद्दूरतरं अपसेध अपगमय । यतस्त्वं अस्माभिः प्रार्थितः सन् पृथिवीं उत अपि च द्यां उपश्वासय । हे दुन्दुभे ते तव स्थावरं जंगमं जगत् । विष्टितं विविधं स्थितं मनुतां मन्यताम् ॥ ५५ ॥

आक्रन्दय बलमोजो न आधा निष्टनिहि दुरिताबाधमानः ।
अपप्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥ ५६ ॥

हे दुन्दुभे, शत्रुसेनाना..... (Lucuna)(सेनामा[क्रन्दय])दीनान् आक्रन्दय कारय । पिता मे हतः भ्राता मे हत इति कृत्वा पलायध्वम् । उत बलं ओजो न आधा । बलं शारीरं ओजो मानसं तेजः नः अस्माकं आधा आधेहि । किं च । दुरिता निबाधमानः सन्निष्टनिहि निश्चितं जयाय कुरु । किं च । अपप्रोथ दुच्छुना दुष्टस्थानाः सेनाः अपप्रोथ । अपकृत्यापकृत्यापप्रोथ नाशय । दुःसुखा विसर्जनीयस्य दत्वम् । यतस्त्वं इन्द्रस्य मुष्टिरसि अतस्त्वां ब्रवीमि आत्मानं वीडयस्व दृढीकुरु ॥ ५६ ॥

आमूरज प्रत्यावर्तयेमाः केतुमदुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ ५७ ॥

गायत्री ऐन्द्री आअज । 'अज गतिक्षेपणयोः' (पा.धा.२३८) आक्षिप । अमूः शत्रूसेनाः आक्षिप प्रावर्तय । इमाः अस्मदीयया सेनया जितमिति दुन्दुभिर्वावदीति । लोडर्थे लट् । जयी प्रकाशं अत्यर्थं वदतु । समश्वपर्णाश्चरन्ति नो नरः । अस्माकं नराः अश्वपर्णाः अश्वारूढाः अस्मदीया मनुष्याः संग्रामे संचरन्तु । हे इन्द्र त्वत्प्रसादात् अस्माकं रथिनो जयन्तु ॥ ५७ ॥

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः संहितोऽधोरामः सावित्रो वारुणः कृष्ण एकशितिपात्पेत्वः ॥ ५८ ॥

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः पेत्वः ॥ ५९ ॥

अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्र औष्णिहाय त्रयस्त्रिंशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्या अष्टाकपालः ॥ ६० ॥

'आग्नेयः कृष्णग्रीव' इति श्रुतिः आ अध्यायपरिसमाप्तः(प्तेः) द्वयोरेकादशान्यः (शिन्योः) पशुदेवतासंबन्धविधायिनी ॥ ५८ ॥ ५९ ॥ ६० ॥

इति मन्त्रभाष्य ऊनत्रिंशोऽध्यायः ॥

॥ त्रिंशोऽध्यायः ॥

देव॑ सवितः प्रसु॑व य॒ज्ञं प्रसु॑व य॒ज्ञप॑तिं॒ भगा॑य ।
दि॒व्यो ग॑न्ध॒र्वः के॑त॒पूः केतं॑ नः पुनातु वा॒चस्पति॒र्वाचं॑ नः स्वदतु ॥ १ ॥

तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि ।
धियो॒ यो नः॑ प्रचो॒दया॑त् ॥ २ ॥

इत उत्तरं पुरुषमेधो द्वावध्यायौ पुरुषोऽपश्यत् । त्रिस्रः सावित्रीराहुतीर्जुहोति । तत्र द्वे व्याख्याते । हे देवसवितः ॥ १ ॥ २ ॥

विश्वा॑नि देव सवितर्दुरि॒तानि॒ परा॑सुव ।
यद्भ॒द्रं तन्न॒ आसु॑व ॥ ३ ॥

विश्वानि दुरितानि असह्यानि परासुव । परां विगमय । यच्च भद्रं भन्दनीयं तत् नः अस्माकं आसुव आगमय ॥ ३ ॥

विभ॒क्तारं॑ ५ हवामहे॒ वसो॑श्चि॒त्रस्य॒ राध॑सः ।
स॒वि॒तारं॑ नृ॒चक्ष॑सम् ॥ ४ ॥

वसोर्वासयितुः । चित्रस्य चायनीयस्य । राधसः धनस्य विभक्तारं सवितारं नृचक्षसम् । नृणां द्रष्टारं हवामहे आह्वयामः ॥ ४ ॥

अतः परं[आ] अध्यायसमाप्तेः पुरुषमेधिकाः पशवः श्रुतिब्राह्मणोक्ता ज्ञातव्याः ।
'तान्वै मध्यमेन्नालभत' इत्युपक्रम्य नामानि निघण्टुनिगमनि[रु]क्तव्याकरणेभ्योऽवगन्तव्यानि ॥

ब्रह्म॑णे ब्राह्म॒णं क्ष॒त्राय॑ राज॒न्यं॒ म॒रुद्भ्यो वैश्यं॒ तप॑से शू॒द्रं तम॑से॒ तस्क॑रं नार॒काय॑
वीर॒हणं॑ पा॒प्मने॑ क्ली॒बमा॑क्र॒याया॑ अयो॒गूं कामा॑य पुँश्च॒लूमति॑क्रुष्टाय माग॒धम् ॥ ५ ॥

नृ॒त्ताय॑ सू॒तं गी॒ताय॑ शैलू॒षं धर्मा॑य सभाच॒रं न॒रिष्टा॑यै भीम॒लं न॒र्माय॑ रे॒भ ५ हसा॑य॒
कारि॑मानन्दाय॑ स्त्री॒ष॒खं प्र॒मदे॑ कुमारीपु॒त्रं मे॒धायै॑ रथका॒रं धैर्या॑य॒ तक्षा॑णम् ॥ ६ ॥

तप॑से कौला॒लं मा॒यायै॑ क॒र्मारं॑ ५ रू॒पाय॑ मणिका॒र ५ शु॒भे व॒प५ शर॒व्याया॒ इषु॑का॒र५
हे॒त्यै ध॑नुष्का॒रं कर्म॑णे ज्याका॒रं दि॒ष्टाय॑ रज्जुस॒र्जं मृ॒त्यवे॑ मृग॒युमन्त॑काय श्व॒निन॑म् ॥ ७ ॥

न॒दीभ्यः॑ पौञ्जि॒ष्ठमृ॒क्षीका॑भ्यो॒ नैषा॑दं पुरुषव्या॒घ्राय॑ दु॒र्मदं॑ गन्धर्वाप्स॒रोभ्यो॒ व्रात्यं॑ प्र॒युग्भ्य॒ उन्म॑त्त५
सर्प॑देवज॒नेभ्योऽप्र॑तिपद॒मर्ये॑भ्यः कित॒वमी॒र्यता॑या॒ अकि॑तवं पिशा॒चेभ्यो॑ विदलका॒रीं या॑तु॒धाने॑भ्यः
कण्टकीका॒रीम् ॥ ८ ॥

सन्धये जारं गेहायोपपतिमात्यै परिवित्तं निर्ऋत्यै परिविविदानमराध्या एदिधिषुःपतिं निष्कृत्यै पेशस्कारी ँ संज्ञानाय स्मरकारीं प्रकमोद्यायोपसदं वर्णायानुरुधं बलायोपदाम् ॥ ९ ॥

उत्सादेभ्यः कुब्जं प्रमुदे वामनं द्वाभ्यः स्राम ँ स्वप्नायान्धमधर्माय बधिरं पवित्राय भिषजं प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षाया अभिप्रश्निनं मर्यादायै प्रश्नविवाकम् ॥ १० ॥

अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालं वीर्यायाविपालं तेजसेऽजपालमिराये कीनाशं कीलालाय सुराकारं भद्राय गृहप ँ श्रेयसे वित्तधमाध्यक्ष्यायानुक्षत्तारम् ॥ ११ ॥

भायै दार्वाहारं प्रभाया अग्र्येधं ब्रन्धस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितार ँ सर्वेभ्यो लोकेभ्य उपसेक्तारमवक्रत्यै वधायोपमन्थितारं मेधाय वासःपल्पूलीं प्रकामाय रजयित्रीम् ॥ १२ ॥

ऋतये स्तेनहृदयं वैरहत्याय पिशुनं विवित्त्यै क्षत्तारमौपद्रष्ट्रयायानुक्षत्तारं बलायानुचरं भूम्ने पकिष्कन्दं प्रियाय प्रियवादिनमरिष्ट्या अश्वसाद ँ स्वर्गाय लोकाय भागदुघं वर्षिष्ठायनकाय परिवेष्टारम् ॥ १३ ॥

मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तार ँ शोकायाभिसर्तारं क्षेमाय विमोक्तारमुत्कूल-निकूलेभ्यस्त्रिष्ठिनं वपुषे मानस्कृत ँ शीलायाञ्जनीकारीं निर्ऋत्यै कोशकारीं यमायासूम् ॥ १४ ॥

यमाय यमसूमथर्वभ्योऽवतोका ँ संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सरायातीत्वरी-मिद्वत्सरायातिष्कद्वरीं मत्सराय विजर्जरा ँ संवत्सराय पलिक्नीमृभुभ्योऽजिनसन्ध ँ साध्येभ्यश्चर्मम्नम् ॥ १५ ॥

सरोभ्यो धैवरमुपस्थावराभ्यो दाशं वैशन्ताभ्यो वैन्दं नेड्वलाभ्यः शौष्कलं पाराय मार्गारमवाराय कैवर्तं तीर्थेभ्य आन्दं विषमेभ्यो मैनाल ँ स्वनेभ्यः पर्णकं गुहाभ्यः किरात ँ सानुभ्यो जम्भकं पर्वतेभ्यः किंपूरुषम् ॥ १६ ॥

बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्चादोपाय ग्लाविनं विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै स्वपनमात्यै जनवादिनं व्युद्ध्या अपगल्भ ँ सँशराय प्रच्छिदम् ॥ १७ ॥

अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुं मृत्यवे गोव्यच्छमन्तकाय गोघातं क्षुधे यो गां विकृन्तन्तं भिक्षमाण उपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने सैलगम् ॥ १८ ॥

प्रतिश्रुत्काया अर्तनं घोषाय भषमन्ताय बहुवादिनमनन्ताय मूक ँ शब्दायाडम्बराघातं महसे वीणावादं क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मं वनाय वनपमन्यतोऽरण्याय दावपम् ॥ १९ ॥

नमाय पुंश्चलूꣳ हसाय कारिं यादसे शाबल्यां ग्रामण्युं गणकमभिक्रोशकं
तान्महसे वीणावादं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् ॥ २० ॥

अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय वꣳशनर्तिनं दिवे खलति ꣳ सूर्याय हर्यक्षं नक्षत्रेभ्यः किर्मिरं चन्द्रमसे किलासमह्ने शुक्लं पिङ्गाक्षꣳ रात्र्यै कृष्णं पिङ्गाक्षम् ॥ २१ ॥

अथैतानष्टौ विरूपानलभतेऽतिदीर्घं चातिह्रस्वं चातिस्थूलं चातिकृशं
चातिशुक्लं चातिकृष्णं चातिकुल्वं चातिलोमशं च ।
अशूद्रा अब्राह्मणास्ते प्राजापत्याः ।
मागधः पुंश्चली कितवः क्लीबोऽशूद्रा अब्राह्मणास्ते प्राजापत्याः ॥ २२ ॥

इति मन्त्रभाष्ये त्रिंशोऽध्यायः ॥

(to be continued in the
next issue of the Journal)